# संस्कृतसाहित्ये राष्ट्रियभावना

डा० धनञ्जयवासुदेवद्विवेदी

सहायक प्रोफेसरः, संस्कृतविभागस्य,

डा० श्यामाप्रसादमुखर्जीविश्वविद्यालयस्य , राँचीस्थस्य

'राष्ट्र' शब्दः भ्वादिगणीय दीप्त्यर्थे 'राज' धातुना 'ष्ट्रन' प्रत्यययोगेन निष्पन्नः भवति। राष्ट्रे भवः राष्ट्रियः। राष्ट्रसम्बन्धिनी भावनैव राष्ट्रियभावना। राष्ट्रियभावनैव सा भावना या मानवं स्वदेशोन्नत्यर्थं प्रेरयति, स्वदेशाभिमानं स्वदेशगौरवं च प्राणेभ्योप्यधिकं मन्यते। सम्पूर्णसंस्कृतवाङ्मयं राष्ट्रियभावनया परिपूर्णं वर्तते। ऋग्वेदे-अहं राष्ट्री सङ्गमनी वसूनाम् (ऋग्वेद-10/125/3), यजुर्वेदे-वयं राष्ट्रे जागृयाम पुरोहिता (यजुर्वेदे-9/23)। रामायणमहाभारतपुराणादिषु स्वदेशगौरवं देशभक्तिश्च बहुधा कीर्त्यते। स्वदेशभक्तिभावनयैव प्रेरिताः शतशो महात्मानः शूरा वीराश्च सर्वस्वं विहायापि देशरक्षणं व्यदधुः।

राष्ट्रभक्तिः जन्मिनोऽनिवार्यं कर्तव्यम्। राष्ट्रभक्त्यैव देशोन्नतिभावना समाजसुधारभावना समाजोन्नतिकामना, राष्ट्रश्रीवृद्धिकरणम्, शत्रून्मूलनपुरःसरं राष्ट्रस्य सर्वविधसुदृढीकरणं प्रवर्तते। यत्र न जागर्ति देशभक्तिभावः स मानवः पशुसंकाशो गण्यते। यत्र न सञ्चरति, न प्रवहति च राष्ट्रभक्तिधारा तज्जीवनं शुष्कसरिदेव। मनुष्यः यस्मिन् राष्ट्रे जन्म गृह्णाति, तस्मिन् समर्पणभावना आदरभावना च राष्ट्रभक्तिः कथ्यते।

यस्मिन् अपि देशे जनः जन्म लभते तस्य अन्नेन जलेन वायुना च तस्य मनुष्यस्य देहनिर्माणं भवति। अतः तं प्रतितस्य प्रेम, आदरः, समर्पणभावना वा स्वाभाविकी। जननीवत् जन्मभूमिरपि प्राणेभ्योऽपि प्रियतमा तथा स्वर्गादपि गरीयसी। यो मानवः स्वकीयायाः प्राणेभ्योऽप्यधिकप्रियतमायाः जन्मभूमेः सर्वदैव स्मरेच्चेत् तर्हि तत्र विदेशे सुखादप्यधिकं सुखमादरं यशश्च प्राप्नुयात्।धन्यतमा इयं जन्मभूमिः या अस्माकं मात्रा सह अस्मानपि लालयति पालयति पोषयति वर्धयति च। जन्मभूमिप्रशंसापरः श्लोकोऽयं पुण्यश्लोकतां भजते-

**जन्मभूमिं विहायान्यां भूमिं यः सेवते जनः।**

**सुरभिं स निराकृत्य रासभीं भजते जडः।।**

वैदिकवाङ्मये राष्ट्रियभावनया ओतप्रोतेन वैदिकर्षिणा निवेद्यते-

**अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे।**

**तेनास्मान् ब्रह्मणस्पतयेऽभिराष्ट्राय वर्धय।।**



E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

भारतदेशस्य जनतायाः भावनाः मूलरूपेण भारतदेशस्य भौगोलिकीसीमाभिः तथा च प्राकृतिकसम्पदाभिः सह संयोजिताः भवन्ति। 'स्वप्नवासवदत्तम्' नाटके महाकविभासेन उल्लिखितमस्ति यत्-

**इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्।**

**महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः।।**

अस्माकम् इयं राष्ट्रभूमिः तिस्रसु दिक्षु सागरेणावृता अस्ति। हिमालयविन्ध्याचलौ धारयन्ती एकसाम्राज्यध्वजेनरक्षिता अस्ति भारतभूमि। इमां भारतभूमिः शक्तिसम्पन्नः राजा एव शासयेत। अस्माकं राष्ट्रस्य 'भारत' इति संज्ञायाः सार्थकतां प्रतिपादयन् विष्णुपुराणकारेणोक्तं यत्-

**उत्तरेण समुद्रस्य हिमाद्रेश्चैव दक्षिणे।**

**वर्षं तद् भारतं नाम भारती यत्र सन्ततिः।।**

अथर्ववेदे पृथिवीसूक्तस्य मन्त्रोऽयं-"माता भूमिः पुत्रोऽहं पृथिव्याः" भारतभूमिं प्रति पुत्रवदात्मीयतायाः भावं सदा स्फारयति। अस्माकं माता यथा अस्मान् पोषयति तथैव इयं जन्मभूमिः अपि अस्मान् पोषयति तथैव इयं जन्मभूमिः अपि अस्मान् पालयति। वयं भूमातुः एव अङ्के स्वसखाबालमित्रैः सह क्रीडामः। तया एव प्रदत्तं अन्नं, फलं, मूलं जलादिकञ्च पिवामः। धन्या इयं भूमिः जन्मभूमिः या अस्माकं मात्रा सह अस्मान् लालयति पोषयति वर्धयति आत्मसात् च करोति। अतएव जन्मभूमिं स्वदेशञ्च प्रति अस्माकं हृदये सम्मानः आदरश्च स्वाभाविक एव वर्तते। मनुष्यः यत्र कुत्रापि गच्छति तत्रापि जन्मभूमेः सदा समरत्येव। स्वदेशाद् अन्यत् किमपि स्थानं सुखकरं न विद्यते। यथोक्तम्-

**अस्ति यद्यपि सर्वत्र नीरं नीरजराजितम्।**

**रमते न मरालस्य मानसं मानसं विना।।**

भारतभूमेः प्राकृतिकां वनसम्पदां जलस्रोतान् पर्वतान् पशूञ्च प्रत्यपि दैवीयभावः मन्यते एषा अपि राष्ट्रियभावना एव।

राष्ट्रस्य समृद्धिः तदैव स्थिरवती भविष्यति यदा राष्ट्रस्य सुरक्षा समीचीना भविष्यति। अतः राष्ट्रस्य भक्ताः जनाः सदा सचेतनाः सतर्काश्च भवेयुः। अभिज्ञानशाकुन्तले महाकविकालिदासेन कामयते यत्-'प्रवर्ततां प्रकृतिहिताय पार्थिवः'। राजानः सदा जगद्धिताय प्रवृत्ताः भवन्तु। ते स्मयदूषिता न भवन्तु। तेषां कर्तव्यमस्ति यत् येन विद्यानां, विदुषः विद्यार्थिनश्च सदा रक्ष्यन्ताम्।

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

कविना भर्तृहरिणा कथयति यत् शिवानि व्यवहारानि एव राष्ट्रकल्याणकानि भवन्ति-

**राजन्दुधुक्षसि यदि क्षितिजधेनुमेनां**

**तेनाद्य वत्समिव लोकमिमं पुषाण।**

**तस्मिंश्च सम्यगनिशं परिपोष्यमाणे**

**नानाफलं फलति कल्पलतेव भूमिः।।**

महाकविः अश्वघोषः कथयति यत् राष्ट्रस्य कृते शिवं व्यवहारम् अधिकमावश्यकमन्यते।अनया न्यायप्रक्रियया एव राष्ट्रनिर्माणं भवति भविष्यति च।

राष्ट्रिभावनायाः सम्यक् प्रसाराय शिक्षायाः महती आवश्यकता अस्ति। शिक्षायाः प्रसारेणैव नागरिकेषु सदसद्विवेकः आगच्छति। जाग्रतजनता राष्ट्रविरोधीतत्त्वानां सहायका न भूत्वा तेषां शमने सहायिका एव भवति भविष्यति चापि। सद्शिक्षायाः सम्यक् प्रसारेण जनाः वृत्तिरहिताः न भवन्ति। विद्या सुमतिं सम्पत्तिं समृद्धिं च ददाति। शिक्षया जनेषु जाग्रति आयाति वैचारिकभेदाः समन्ति। सद्शिक्षायाः अभावे जनेषु मतभेदाः जाग्रन्ति तेन कारणेन क्षेत्रवादः जातिवादः भाषावादः साम्प्रदायिकता च उद्भवति यस्य दुष्फलं भारतेन निकटभूतकाले एव भुक्तम्। अतः राष्ट्रभेदकानां तत्त्वानां शमनाय कवि जनानाह्वयति-

**अलं भारतीयाः मतानां विभेदैः अलं देशभेदेन वैरेण चालम्।**

**अयं शाश्वतो धर्म एको धरायां न सम्भाव्यते धर्मतत्त्वेषु भेदः।।**

ऐक्यभावनायाः स्थापनाय वैदिकर्षिः कथयति-

"सङ्गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्।

देवा भागं यथा पूर्वे सञ्जानाना उपासते।।

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।

समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहामि।।

समानी व आकूतिः समाना हृदयानि वः।

समानमस्तु वो मनो यथा वः सुसहासति।।"

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

अर्थात् भवन्तः सर्वे एकीभूताः सन्तु। एकीभूत्वा वदन्तु। मिलित्वा एव ज्ञानलाभं कुर्वन्तु। सर्वे सहसम्पर्किणः भवन्तु, सौमनस्यं निर्मान्तु, यथायोग्यं यथावसरे स्वदायित्वं पूर्णं कुर्वन्तु। मिलित्वैव मन्त्रणां कुर्वन्तु। सर्वासु समितिषु समानमधिकारं स्वीकुर्वन्तु, राष्ट्रलक्ष्ये समहृदयाः भवन्तु। सर्वे मिलित्वा राष्ट्रकार्यं कुर्वन्तु।

भ्रष्टाचारः राष्ट्रघातको एव तस्मात् भ्रष्टाचारात् मुक्तेः स्वार्थत्यागः एव राष्ट्रं प्रति समर्पणभावं महतावश्यकं वर्तते। शासकाः प्रशासकाश्च रागद्वेषरहिताः भूत्वा शासयन्तु। न्यायप्रक्रियायां न्यायाधीशाः विधिवेत्तारश्च, शिक्षणे शिक्षकाः, चिकित्सायां चिकित्सका, पत्रकारितायां पत्रकाराः, रक्षणे सैनिकाः एकं भावं केवलमेव धारयन्तु यत् मम कार्यं राष्ट्रहेतोरेव न मम च मम परिजनानां कृते केवलम्।

राष्ट्रस्य स्वास्थ्यसमृद्धिः प्रजायाः स्वास्थ्यसमृद्धेः उपरि आश्रिता भवति। प्रजायाः व्यसनेभ्यः रक्षां प्रति तथा स्वास्थ्यसमृद्धिं प्रति प्राचीनकालादेव ध्यानं दीयते। अतः सर्वेषां राष्ट्रव्यापिनां जीवानां सर्वकल्याणाय कामना क्रियते अत्र-

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्।।**

जनतायाः सुरक्षायै राष्ट्रसुरक्षायै च जनसामान्येषु जागरुकतायाः सतर्कतायाः भावनापि अधिकावश्यका अस्ति। सर्वेषां राष्ट्रवादिनां कर्तव्यमस्ति यत् ते स्वकीये परिक्षेत्रे देशवञ्चकान् घातकाञ्च न अभिवधेयुः। ऋग्वेदे उपदिश्यते यत् देशद्रोहिजनाः न आश्रयीतव्याः। तान् नष्येत्। सन्देहं जनिते प्रशासनं सूचयित्वा राष्ट्ररक्षणे आरक्षकानां सहायको भवितव्यः। राष्ट्रसम्पदाहन्तकेभ्यः राष्ट्रं रक्षय।

कस्यापि राष्ट्रस्य कीर्तिपताका तस्य देशस्य संस्कृतिरेव भवति। भारतीया संस्कृतिः अनेकतायामेकतां धारयति। अनेकाः धर्माः मतमतान्तराः विविधाः भाषाः उपासनापद्धतयश्च प्रचलन्ति तदपि सर्वेषु एकसूत्रता एकता च वर्तते। विनाशाय कोऽपि धर्मः न उपदिशति। सद्धर्मः अन्यं किञ्चिदपि धर्मं न बाधते। धर्मस्य यथार्थपरिभाषा महाभारते वर्णितमास्ते-

**धर्मं यो बाधते धर्मो न स धर्मः कुधर्मकः।**

**अविरोधत्तु यो धर्मः स धर्मः सत्यविक्रमः।।**

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi

स एव धर्मः य अन्यं धर्मं न बाधते। यः धर्मः अन्यं धर्मं बाधते स धर्मः धर्मः नास्ति तत्तु कुधर्मः एव। सर्वेषां धर्माणामेकतैव सर्वजनकल्याणकारिका राष्ट्रकल्याणकारिका च वर्तते। सम्प्रति अस्मिन् प्रसङ्गे वैदिकर्षेः कथनं प्रासङ्गिकमस्ति-

**जनं बिभ्रती बहुधा विवाचसं नाना धर्माणं पृथिवी यथौकसम्।**

**सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ति।।**

अर्थात् भवन्तः सर्वे जनाः स्वकीयेन सुविधानुसारेण कस्यांचिदपि ऐच्छिकायां भाषायां वार्तालापं कुर्वन्तु, यथेच्छिकं धर्मं पालय किन्तु स्वकीयं समग्रराष्ट्रं स्वगृहसमं मानय। सर्वेजनाः एकीकृतभूत्वा राष्ट्रं रक्षय, वर्धय। तदैव राष्ट्रं रक्षितं संवर्धितं भविष्यति, सर्वे जनाः अपि सुखिनः भविष्यन्ति।

अनेन प्रकारेण स्पष्टमस्ति यत् संस्कृतवाङ्मयं राष्ट्रियभावनया ओतप्रोतमस्ति। संस्कृतजगतः सर्वेषां मनीषिणां सम्पूर्णचिन्तनं राष्ट्रहिताय एव अस्ति।

E-Learning material prepared by Dr. Dhananjay Vasudeo Dwivedi